# Yamakritam Krishnanarayana Stotram

# યમકૃતં કૃષ્ણનરાયણસ્તોત્રમ્

## Document Information

Text title : Yamakritam Krishnanarayana Stotram

File name : yamakRRitaMkRRiShNanarAyaNastotram.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 581/72-84||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# યમકૃતં કૃષ્ણનરાયણસ્તોત્રમ્

નિઃશ્વસન્તં ચ દીનં ચ સ્વાધિકારનિરર્થકમ્ ।
યમરાજાઽપિ નીલાદ્રૌ શ્રીહરિં પ્રણિપત્ય ચ ॥ ૭૦॥

તુષ્ટાવ શ્રીજગન્નાથં સ્વાધિકારદૃઢસ્થિતૌ ।
નમસ્તે ચૈકતત્ત્વાય દ્વૈતાયાઽનન્તકાય ચ ॥ ૭૧॥

સ્વપ્રોતસર્વરૂપાય ધૃતિપુષ્ટિકરાય ચ ।
સર્વાભાસાધિદેવાય નમસ્તે સર્વયોનયે ॥ ૭૨॥

વિશ્વાસાય ગુરવે સાક્ષિણે તે નમો નમઃ ।
કારુણ્યસિન્ધવે તુભ્યં પરાતીતાય તે નમઃ ॥ ૭૩॥

જન્મમૃત્યુપ્રહર્ત્રે તે નમોઽસ્તુ દીનબન્ધવે ।
માયાધિષ્ઠાત્રાત્મને તે પીતકૌશેયવાસસે ॥ ૭૪॥

માયાચક્રકર્તનાય ચક્રિણે તે નમો નમઃ ।
દણ્ડદાત્રેઽધિકર્ત્રે તે પરમેશાય વૈ નમઃ ॥ ૭૫॥

નીલમેઘસુવપુષે નીલાદ્રિવાસિતાય ચ ।
નમસ્તે પુણ્ડરીકાક્ષિશોભિતાય ગદાભૃતે ॥ ૭૬॥

શ્રીવત્સકૌસ્તુભશોભાભાસત્સમૂઢવક્ષસે ।
નીલવર્ણં નીલશૈલગુહાવાસં કૃપાલયમ્ ॥ ૭૭॥

આશ્રિતાનાં તુ દુઃખઘ્નં પ્રણમામિ પરાત્પરમ્ ।
યત્પાદયોરાશ્રયે સંલ્લુબ્ધા શ્રીરનપાયિની ॥ ૭૮॥

વર્તતે શાશ્વતી લક્ષ્મીર્ભક્તૈશ્વર્યપ્રદાયિની ।
યા પ્રકૃતિઃ પરાધીના પરેશ તવ વાઞ્છયા ॥ ૭૯॥

ત્વામાવૃત્ય વિકાસં સમ્પ્રયાતિ બન્ધમુક્તયે ।
ભુક્તભોગાય ચાર્પયતિ નિર્વાણતાં ત્વદિચ્છયા ॥ ૮૦॥

ત્વમેવ તુ પરબ્રહ્મ બ્રહ્મરૂપેણ વર્તસે ।
ભૂમરૂપેણ ચ વ્યૂહરૂપેણ વર્તસે તથા ॥ ૮૧॥

યમરૂપેણ ચ રુદ્રરૂપેણ વર્તસે વિભો ।
લક્ષ્મીનારાયણ વિષ્ણો કૃષ્ણનારાયણપ્રભો ॥ ૮૨॥

કામ્ભરેયમહારાજ કૃપાલો તે નમો મુહુઃ ।
પ્રભાનારાયણ પાર્વતીશનારાયણ પ્રભો ।
હંસનારાયણ મઞ્જૂનારાયણ નમોઽસ્તુ તે ॥ ૮૩॥

સગુણેશ તવ પત્નીં દુઃખહર્ત્રીં નમામ્યહમ્ ।
પુત્રચિન્તાવારયિત્રીં ધારયિત્રીં નમામ્યહમ્ ॥ ૮૪॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૫૮૧-અધ્યાયાન્તર્ગતં
યમકૃતં કૃષ્ણનરાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૫૮૧/૭૨-૮૪॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 581/72-84..

Proofread by PSA Easwaran

---

*Yamakritam Krishnanarayana Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*